Shodhshauryam, International Scientific Refereed Research Journal
© 2019 SHISRRJ | Volume 2 | Issue 2 | ISSN : 2581- 6306

# अभिराजयशोभूषणम्; एकं अभिनवं काव्यशास्त्रम्



**सन्दीप कुमार द्विवेदी**
सहायक प्राध्यापक,
संस्कृत विभाग,
भारतीय महाविद्यालय फर्रुखाबाद,
उत्तर प्रदेश, भारत।

**सारांशः** – संस्कृतकाव्यशास्त्रपरम्परायां आचार्यभरतादारभ्य नैके काव्यशास्त्रिणः अबीभवन्। यैः स्व–स्वग्रन्थरत्नेषु काव्यशास्त्रीयतत्त्वानां समालोचनं विधत्तम्। स्वातन्त्र्योत्तरकालेऽपि अनेके आचार्याः काव्यशास्त्रपरम्परायां स्वकीयं विशिष्टमवदानं प्रदत्तवन्तः। स्वातन्त्र्योत्तरप्रणीतेषु काव्यशास्त्रग्रन्थेषु प्राचीनपरम्पराया अनुमोदनेन सह नूतनविचाराणां वर्णनं विहितं साम्प्रतिकैराचार्यैः। स्वातन्त्र्योत्तरकाले काव्यशास्त्रविद्भिः काश्चन नूतनोद्भावना अपि विहिताः। परं च न केनचिदप्याचार्येण स्वपूर्ववर्त्तिणामाचार्याणां मतेषु समन्वितिः प्रदर्शिता। एतादृशं वैषम्यमभिलक्ष्य परम्परायां स्वातन्त्र्योत्तरकाले च प्रणीतेषु काव्यशास्त्रग्रन्थेषु किन्तावत् शाश्वतं सार्वभौमिकञ्च तत्त्वं वर्तत इति मनसि निधाय आचार्याभिराजराजेन्द्रमिश्रवर्यैः स्वकीयं अभिराजयशोभूषणाभिधम् अभिनवकाव्यशास्त्रस्य ग्रन्थरत्नं प्रणीतम्। 2006तमे वर्षे वैजयन्तीप्रकाशन–इलाहाबादतः प्रकाशितोऽयं ग्रन्थः। अस्मिन् सप्तषष्ट्युत्तरपञ्चशतमिताः (567) कारिकाः उपनिबद्धाः सन्ति। आचार्य अभिराजराजेन्द्रमिश्रमहोदयानां काव्यशास्त्रीयतत्त्वानां समीक्षणविषयकः अभिनवोपन्यासः निश्चयेन प्राक्कालिकीं शास्त्रीयपरम्परामधिगन्तुं आधुनिकसन्दर्भाणाञ्च परामर्शयितुं अस्मान् सर्वानप्युपकरोति। अतः अस्माभिः अस्मिन् शोधपत्रे अभिराजयशोभूषणस्य समग्रं वैशिष्ट्यं उपस्थाप्यते।

**मुख्यशब्दः** – संस्कृतकाव्यशास्त्रपरम्परा, स्वातन्त्र्योत्तरकालः, काव्यशास्त्रविद्भिः, अभिराजयशोभूषणम्, आचार्य अभिराजराजेन्द्रमिश्रः, काव्यस्वरूपम्, काव्यभेदाः, सर्जनशीलता, अर्वाचीनकाव्यविधाः, गलज्जलिका, छन्दोमुक्तकाव्यम्, लोकगीतानि, कजरीगीतम्, रसिकगीतमित्यादयः।

संस्कृतकाव्यशास्त्रपरम्परा वैदिककालादारभ्य अद्यावधि यावत् स्वकीयया प्रवाहनित्यतया अगाधजलधिरिव गभीरा विशाला सुदृढा चाधिष्ठिता । राराजत एषा नाट्यशास्त्रकर्तुः मुनिश्रेष्ठाचार्यभरतादारभ्य अद्यावधित्रिवेणिकविसंज्ञितमाचार्याभिराजराजेन्द्रमिश्रं यावत्। अजस्रं प्रवहन्त्यां काव्यशास्त्रपरम्परायां स्वातन्त्र्योत्तरकालेऽपि नैके काव्यशास्त्रिणः वर्तन्ते । येषु आचार्यरेवाप्रसादद्विवेदि – आचार्यब्रह्मानन्दत्रिपाठि – आचार्यराधावल्लभत्रिपाठि – आचार्यरहसविहारिद्विवेदि – आचार्यशिवजी – उपाध्यायाश्च प्रमुखाः। स्वातन्त्र्योत्तरप्रणीतेषु काव्यशास्त्रग्रन्थेषु प्राचीनपरम्पराया अनुमोदनेन समन्नूतनविचाराणां वर्णनं विहितं साम्प्रतिकैराचार्यैः। अर्वाचीनाचार्यैः काव्यशास्त्रस्य विवेच्यविषयाणां काव्यलक्षणहेतुप्रयोजनादीनां वर्णने नव्याशैली उद्भाविता एवञ्च काश्चन नूतनोद्भावना अपि

विहिताः। एवं प्रकारेण स्वातन्त्र्योत्तरकालेऽपि काव्यशास्त्रस्य श्रीवृद्धिः नितरां प्रकाशमानावलोक्यते। परम्परायां समुद्भूतेषु स्वातन्त्र्योत्तरप्रणीतेषु च काव्यशास्त्रेषु प्रतीयते महद्वैभिन्यं, यतो हि न केनचिदप्याचार्येण स्वपूर्ववर्तिणामाचार्याणां मतेषु समन्वितिः प्रदर्शिता; फलतः नैकानि मतानि सन्दृश्यन्ते विदुषाम्। एतादृशं वैषम्यमभिलक्ष्य परम्परायां स्वातन्त्र्योत्तरकाले च प्रणीतेषु काव्यशास्त्रग्रन्थेषु किन्तावत् शाश्वतं सार्वभौमिकञ्च तत्त्वं वर्तत इति मनसि निधाय संपूर्णानन्दसंस्कृतविश्वविद्यालयस्य कुलपतिचरैः राष्ट्रपतिपुरस्कारेण सभाजितैः आचार्याभिराजराजेन्द्रमिश्रवर्यैः स्वकीयं अभिराजयशोभूषणाभिधमभिनवकाव्यशास्त्रं प्रस्तुतम्। 2006तमे वर्षे वैजयन्तीप्रकाशन–इलाहाबादतः प्रकाशितोऽयं ग्रन्थः। तच्चेदं 'अभितो धरित्र्यां स्वर्गलोके च राजन्ते ये ते अभिराजाः कवयः सहृदयाश्च। तेषां यश एव भूषणं यस्य तन्नूतनं काव्यशास्त्रमभिराजयशोभूषणम्। ग्रन्थेऽस्मिन् सप्तषष्ट्युत्तरपञ्चशतमिताः (567) कारिकाः उपनिबद्धाः सन्ति। ग्रन्थकृद्भिः उदाहरणपद्यान्यपि साम्प्रतिककवीनां रचनातः उद्धृतानि ।

ग्रन्थेऽस्मिन् पञ्चोन्मेषाः वर्तन्ते –**परिचयोन्मेषः, शरीरतत्त्वोन्मेषः, आत्मतत्त्वोन्मेषः, निर्मितितत्त्वोन्मेषः, प्रकीर्णतत्त्वोन्मेषश्च**। ग्रन्थस्यास्य सर्वाण्यप्युदाहृतानि पद्यानि समकालीनरचनात एव सङ्कलितानि। प्रत्युन्मेषमभिलक्ष्य ग्रन्थस्यास्य वैशिष्ट्यं तदत्रास्माभिः प्रस्तूयते।

परिचयोन्मेषे शारदागणपतिमृडानीविषयकं मङ्गलं विधाय काव्यशास्त्रीयपरम्परायां समागतान् पूर्वाचार्यान्प्रति प्रणतिं निवेदयन्ति। अनन्तरं स्वकीयकाव्यचिन्तनस्य वैशिष्ट्यनिरूपणे मङ्गलाचरणे स्वाभिप्रायं प्रस्तौति ग्रन्थकारः। तद्यथा–

**सञ्चिनोति यथा भृङ्गः पुष्पात्पुष्पाद्रसाऽऽसवम्।**
**करोमि संग्रहं तद्वद्यावद्भरतकाश्यपम्।।**[1]

इत्थं स्वकीयग्रन्थे काव्यशास्त्रीयसिद्धान्तानां समीक्षणपरिधिं आद्याचार्यभरतादारभ्य आचार्यरेवाप्रसादद्विवेदिपर्यन्तं समाश्रयन्ति। काव्यप्रशंसानन्तरं काव्यस्य प्रयोजनलक्षणकारणभेदानाञ्च वर्णनमभिनवशैल्या प्रतिपादयन्ति आचार्यः।

काव्यप्रयोजनविषये पूर्वाचार्याणाम्भणितिं समुद्धृत्य तत्तदाचार्यैः प्रतिपादितानाम्प्रयोजनानामन्तरे किन्तावत् शाश्वततत्त्वमिति सुनिपुणं परीक्ष्य कर्तृदृशा काव्यस्य निष्प्रयोजनत्वमुक्तम्। यतोहि प्रतिभावन्तः कवयः न केनापि प्रयोजनेन काव्यं कर्तुं प्रभवन्ति। प्रकृत्या निरीहाः कवयः आत्मारामेषूपरमन्ते। न च तेषां हृदि पाप–पुण्य–धन–आनन्दविषयिणी वा लिप्सा बोभूयते। द्विरेफो यथा गुञ्जनादृत उड्डयितुमसमर्थः तथैव काव्यं विना कवेर्जीवनमसम्भाव्यमेव। अत एव काव्यं नाम कवेः नैसर्गिकं कृत्यम्। निसर्गाद् भिन्नं कर्म एव सप्रयोजनं प्रवर्तन्त इति आचार्याः प्रोद्घाटयन्ति –

**काव्यमेतत्ततो मन्ये कविकर्मस्वभावजम्।**
**जन्मजन्मान्तरावाप्तदिव्यसंस्कारसत्फलम्।**[2]

फलतः परमार्थदृशा काव्यं कवेः स्वाभाविकं कर्म, व्यवहारदृशा तु पारम्परिककाव्यप्रयोजनेषु यश एव मूलभूतं प्रयोजनमक्षिलक्ष्यीभवति काव्यविदाम्। काव्यादृते न केनचिदपि कर्मणा ऐहलौकिकी–पारलौकिकी च कीर्तिस्समुपलभ्यते। भुवि सहस्त्रशो हि भूपाः अबीभवन् येषां नामानीदानीं विस्मृतप्रायाणि, किन्तु स्वकीयैः शाश्वतकृतिभिः महाकवयः कविततल्लजाश्चाद्यापि सञ्जीवन्ति जीविष्यन्ति च आचन्द्रतारकं यावत्। यथोक्तञ्च महाकविबिल्हणेन–

---

1. अभिराजयशोभूषणम् / परिचयोन्मेषः / 9
2. तत्रैव / 26

**पृथ्वीपतेः सन्ति न यस्य पार्श्वे कवीश्वरास्तस्य कुतो यशांसि?**

**भूपाः कियन्तो न बभूवुरुर्व्यां जानाति नामापि न कोऽपि तेषाम्?।।**[3]

यशसः प्रयोजनत्वमुक्तवद्भिराचार्यैः कथितम्–

**पश्यन्त्येव यदि प्राज्ञाः काव्यसृष्टौ प्रयोजनम्।**

**परत्रेह च निर्व्याजं यशस्तन्मेऽभिरोचते।।**[4]

स्वातन्त्र्योत्तरकाव्यशास्त्रिभिः आचार्यरहसविहारिद्विवेदिभिः काव्यप्रयोजनानि सन्मार्गप्रेरकत्व–कविकीर्ति–पुरस्कार–स्वान्तःसुखेच्छा–प्राक्कथावस्तुसंस्कार–सच्चरिताङ्कन–राष्ट्रभक्ति–युगधर्म–पर्यावरणचेतना–स्वातन्त्र्य–वीराणामाराधनमित्यादीनि निर्दिष्टानि। एषु साम्प्रतिककालमनुसृत्य भणितानि राष्ट्रभक्ति–पर्यावरणचेतना–युगावश्यकतापूर्तीत्यादीनि प्रयोजनानि आचार्यमिश्रमहोदयैरपि स्वीकृतानि तथा च आचार्यरेवाप्रसादद्विवेदिमहोदयैरपि प्रतिपादितानि।

सकललोकोपकारिकेयं काव्यसृष्टिः केन कारणेन हेतुना वा समुत्पद्यत ? इत्यस्मिन्विषये काव्यशास्त्रिषु वरीवर्तत कश्चिद्द्वैमत्यं तत्र केचन नवनवोन्मेषशालिप्रतिभामेव काव्यहेतुत्वेनाङ्गीक्रियन्ते केचन च प्रतिभासमन्वितव्युत्पत्यभ्यासौ मन्वते। आचार्यमिश्रवर्यैः काव्यसमुद्भवे द्विविधौ हेत्वङ्गीकृतौ लौकिकालौकिकौ च। तत्र अलौकिको हेतुः प्रतिभा, लौकिकस्तु तस्या एव परिपोषकौ व्युत्पत्यभ्यासौ। परं सतोरपि व्युत्पत्यभ्यासयोः प्रतिभां विना काव्यं नोत्पद्यते किन्तु व्युत्पत्यभ्यासाभावेऽपि चमत्कारैकनिष्ठकाव्यं नितरां समुल्लसति। भाषते तद्–

**काव्यप्रणयनहेतुर्द्विविधोऽङ्गीकरणीयः अलौकिको लौकिकश्च। तत्राऽलौकिको हेतुर्दैवायत्तः। द्वितीयश्च लौकिको हेतुर्व्युत्पत्यभ्यासयुगलसमन्वितः प्रयत्नसाध्यः।**[5]

काव्यकरणमीमांसायामाचार्यैः न काचिद्भिन्ना धोरणी समाश्रिताऽपितु केषाञ्चन प्राक्तनानामर्वाचीनाञ्च प्रतिपत्तिमभिलक्ष्यात्र प्रतिभैव काव्योत्सर्जनसाधकतत्त्वमिति स्वेष्टनिदर्शनं समाख्यापितम्। एवञ्च व्याजहार –

**प्रज्ञाबीजं कवित्वस्य शक्तिरूपा चिरन्तनी।**

**जन्मजन्मान्तरोपात्तसंस्कारप्रसवाऽमला।।**[6]

काव्यस्य हेतुस्वरूपा सानातनी सा शक्तिभूता प्रतिभा विभिन्नजन्मनां संस्कारवशात् काव्यरूपे परिणमते येन कविः नवनवोन्मीलनं विदधाति। प्रतिभां विना केवलं व्युत्पत्यभ्यासाभ्यां कवित्वं नैवोत्पद्यत इतीमामवधारणामाचार्यः प्रकटयामास –

**प्रज्ञां विना कवित्वस्य बीजं नैव प्ररोहति।**[7]

अतो आचार्यदृशाऽपि प्रतिभैव काव्यकारणमिति सुतरां निश्चीयते।

सहृदयहृदयानन्दकारिचमत्कारैककारकस्य कारणं प्रयोजनं प्रतिपाद्य किमस्ति तत्काव्यमिति काव्यलक्षणोपन्यासे मिश्रप्रवरः समेषां प्राग्विदां शब्दार्थोभयकाव्यतावादिनां शब्दमात्रकाव्यतावादिनाञ्च मतेषु समन्वितिं प्रदर्श्य शाश्वततत्त्वञ्चाभिलक्ष्य काव्यलक्षणं प्रकाशते।

---

3. विक्रमाङ्कदेवचरितम्/प्रथमसर्गः/26
4. अभिराजयशोभूषणम्/परिचयोन्मेषः/28
5. अभिराजयशोभूषणम्/परिचयोन्मेषः/पृ. 35
6. तत्रैव/30
7. तत्रैव/33

**काव्यं लोकोत्तराख्यानं रसगर्भस्वभावजम्।**
**परत्रेह च निर्व्याजं यशोऽवाप्तिप्रयोजनम्।।**[8]

प्रकृतलक्षणे 'आख्यायते शब्दार्थसमष्टिरित्याख्यानमि'ति व्युत्पत्या शब्दार्थोभयकाव्यतावादिनां प्रत्नाचार्याणां निदर्शनमेवानुकुर्वन्ति। 'लोकोत्तर' इति पदनिवेशेन पण्डितराजजगन्नाथं प्रतिप्रीतिर्प्रदर्श्यन्ते। 'रसगर्भम्' इति वचनेन आचार्यविश्वनाथस्य भावाः परिपुष्यन्ते। एवं शब्दार्थयोस्साहचर्यभाव एव काव्यस्य प्राणभूतः, यतो हि शब्देनैवार्थोऽवबुध्यते, न च कश्चिदपि शब्दः अर्थराहित्येन प्रवर्तते, नैव च कोऽप्यर्थः शब्दं विनैवाभिव्यज्यते। अतोऽनयोः मञ्जुलं सारस्यं साहित्यमेव काव्यत्वेन परिगण्यते। काव्यमपि तत् मनसा–वाचा–कर्मणेति त्रिविधोपादानैः लोकोत्तरमलौकिकत्वं वैलक्षण्यञ्चैव प्रदर्श्येत। माधुर्यादिगुणैः परिनिष्ठितत्वं, च्युतसंस्कारादिकाव्यविघातकैः दोषैः परिष्कृतिः, शब्दार्थरूपकाव्यशोभाधायकानामलङ्काराणां प्रान्वितोन्मेषः, नूत्ननूत्नतमोन्मेषशालित्वञ्च लोकोत्तरत्वप्रबोधकाः हेतवो वर्तन्ते येन तत् लोकोत्तरवैलक्षण्यविशिष्टं काव्यं सर्वानपि काव्यरसपिपासूनुपकरोति एवं तादृशोपकर्तृकाः आचार्याः यशादिभिस्सभाज्यन्ते। तदेभिपद्यैर्विवक्ति आचार्यः –

**शब्दार्थसङ्गमेनैव किञ्चिदाख्यातुमिष्यते।**
**ततश्चोभयसाहित्यं काव्यपर्यायगोचरम् ।।**
**किञ्च, शब्दार्थसाहित्यं काव्यसंज्ञं भवेत्पुनः।**
**मनसाकर्मणावाचा लोकोत्तरमसंस्तुतम्।।**
**सगुणत्वमदोषत्वं निष्प्रयत्नाऽप्यलङ्कृतिः।**
**प्रज्ञा चापि नवोन्मेषा लोकोत्तरत्वकारणम्।।**[9]

काव्यलक्षणं कारणं प्रयोजनञ्च विधाय काव्योपनिबद्धः कश्चन विशिष्टो विषयः काव्यस्य विभेदप्रदर्शनम्। संस्कृतकाव्यशास्त्रस्य विधायिभिरनेकैराचार्यैः स्वविवेच्यविषयरूपेण काव्यभेदविषयः बहुधा व्याकृतः। तेषु भाषाप्रबन्धकाव्यार्थादयश्च प्रमुखाः आधाराः वर्गीकरणस्य। तेष्वन्यतमोऽयं काव्यार्थदृशा भेदनिरूपणप्रसङ्गः। काव्यार्थोऽयं अभिधादिशब्दशक्तीनामाधारेण सुनिश्चीयते। एतान्नाधृत्यैव अभिधेयार्थः, लक्ष्यार्थः, तात्पर्यार्थः, व्यङ्ग्यार्थश्च विभेद्यन्ते। चतुर्ष्वेतेषु वाच्यार्थव्यङ्ग्यार्थयोरेवास्ति सर्वातिशयी प्रतिष्ठा। इमामेवाश्रित्य मम्मटादयः आचार्याः व्युत्पादयन्ति काव्यविभागाः। क्रमेऽस्मिन् मिश्रपादोऽपि प्राकाशि काव्यत्रयीति–**सहृदयास्वाद्यं, कोविदास्वाद्यं, लोकास्वाद्यम्**। विविधैः प्राग्विदैः कृताः उत्तममध्यमाधमरूपाः काव्यप्रकाराः आचार्यस्य हृदयन्नैवाकर्षन्ते। भगवत्याः सरस्वत्याः विग्रहरूपस्य वाङ्मयस्य तदधमोक्त्येति आलपनं अवमाननमेव तस्याः वाग्देव्याः, अतो उत्तमादिकाव्यव्यपदेशान् प्रति औदासीन्यमेव प्रकटयन्ति आचार्यः। यथा च ते–

**काव्यं सहृदयास्वाद्यं कोविदास्वादमेव च।**
**लोकास्वादमिति ख्यातं त्रिविधं रोचते मम।।**[10]

---

8. तत्रैव / 34
9. तत्रैव / 35–37
10. अभिराजयशोभूषणम् / परिचयोन्मेषः / 38

अपि च कोविदत्वं (पाण्डित्यं) सत् सहृदयता प्राधान्येन येषामुपसीदति त एव सहृदयाः, तैरास्वाद्यमानं काव्यमुत्तमकोटिकं सहृदयास्वाद्यमिति फलितम्। अथ च सहृदयतापेक्षया येषु प्रपाठकेषु पाण्डित्यं प्रथमते ते कोविदाः, तैरास्वाद्यमानं काव्यमेव कोविदास्वाद्यमिति द्वितीयं काव्यम्। सहृदयत्वं कोविदत्वञ्चानयोः परिपाकेन रहितं सामान्यबुद्धिवद्भिः लौकिकैः जनैः आस्वाद्यमानं काव्यं लोकास्वाद्यं यो हि तृतीयो भेदः। न काव्यं केवलं पण्डितानां कृते इति स्वीकारे हि काव्यं परिमितं सत् संकुचितततामुपयास्यति, प्रत्युत काव्यं खलु विविधरुचिवतो लौकिकान् जनाननुरञ्जयति। वस्तुतस्तत्र प्राधान्यमपि लौकिकानां सामान्यानामेव। लौकिकास्तु न केवलं सहृदयानामिव व्यङ्ग्यार्थमात्रेण, पण्डितानामिव पाण्डित्येन च मुग्धाः भवन्ति अपि तु स्वभावोक्तिप्रियान् माधुर्यादिगुणैः गुम्फितं, भङ्गीभणितिभिर्मण्डितमुदात्तवर्णनोपन्यस्तं काव्यमेव लौकिकान् समाह्लादते। तद्यथा अवोचत् –

**व्यङ्ग्यार्थाऽवगमे शक्ता यतस्सहृदया बुधाः।**
**पण्डिताश्चापि लक्ष्यार्थे वाच्ये लोकाः समादृताः।।**
**ततस्सहृदयास्वाद्यमाद्यं काव्यविभाजनम्।**
**भाति प्रीततमं हृद्यं स्फुरद्व्यङ्ग्यार्थजीवितम्।**
**उत्तमं यदि चेदं स्याद्यदिवाप्युत्तमोत्तमम्।**
**न तत्र काचिदापत्तिर्वैषम्यं न मतस्य वा।।**[11]

शरीरतत्त्वोन्मेषे शब्दार्थाविति काव्यशरीरम्, एवं काव्यस्य शब्दार्थशरीरगताः धर्माः वृत्ति–रीति–गुणालङ्कार–शब्ददोषाश्च वर्तन्ते। वस्तुतस्सार्थकशब्दसमवायेनैव साहित्यं समुज्जन्यते न त्वनर्थकशब्दैः। अतोऽत्र शब्दार्थयोर्मध्ये अविनाभावरूपस्सम्बन्धः संतिष्ठते। शब्दः स्वार्थं कथं प्रकटयति? प्रश्नोऽयं प्राक्कालादेव चिन्तनीयो विषयः वैयाकरणानाम्। शब्दब्रह्म इति परिकल्पकाः वाक्यपदीयकारो भर्तृहरिः सुविज्ञानमाशयस्यास्य विवक्ति यत् शब्दस्यान्तः अर्थप्रकाशनस्य तिष्ठति काचन विलक्षणा शक्तिः, तयैव शक्त्या प्रकाश्यते तत्स्वार्थः। शक्तयश्च ताः अभिधालक्षणाव्यञ्जनेति। कालान्तरं भाट्टमीमांसकैः तात्पर्याऽपि शक्तिरूपेण प्रतिष्ठाप्यते। शब्दस्य त्रैविध्यमपि यथोपचरितवृत्तिभिः अभिधादि–उपाधिभिः काव्यशास्त्र अधिक्रियते। आचार्यमम्मटदृशाऽपि शब्द–अर्थ–वृत्तिविमर्श उपस्थाप्यते–

**स्याद्वाचको लाक्षणिकः शब्दोऽत्र व्यञ्जकस्त्रिधा।**
**वाच्यादयस्तदर्थाः स्युः तात्पर्यार्थोऽपि केषुचित्।।**[12]

वाचकशब्देनाभिधया वाच्यार्थः, लाक्षणिकशब्देन लक्षणया लक्ष्यार्थः, क्वचित् तात्पर्यार्थोऽपि तात्पर्यया, व्यञ्जकशब्देन व्यञ्जनया व्यङ्ग्यार्थश्च प्रबोध्यते। आचार्यः प्राक्तनाचार्याणां समासां शक्तीनां अत्यन्तसारल्येन विवेचनमत्र प्रस्तुन्वन्ति, शक्तीनामुदाहरणानि साम्प्रतिकान् प्रचलितान् प्रवृत्तीनधिकृत्य निबध्नन्ति। गुणप्रकरणे चिरन्तनाऽचार्याङ्गीकृतान् माधुर्यादित्रिविधगुणानेव स्वीकुर्वन्ति। गुणोदाहरणानि च स्वोतसर्जितानि प्रगतकाव्यग्रन्थेषूपनिबद्धानि नावीन्येनोपस्थापयन्ति। रीतिवृत्तिप्रकरणे तयोः सम्पूर्णमपीतिवृत्तं यथाशास्त्रमभिविन्यसति। अलङ्कारवर्णने नव्यानां प्राच्यानाञ्च विदुषां मान्यताः संस्थाप्यालङ्काराणां लक्षणानि स्फुटतराण्युदाहरणानि च युगानुरूपाणि व्यवस्थापयन्ति।

11. तत्रैव / 40–42
12. काव्यप्रकाशः / द्वितीयोल्लासः / 1

पुरातनकालादेव काव्यतत्त्वस्थापनमिति अन्यतमो विवेच्यपरोऽयं विषयः। अत एव सम्प्रदायाः प्रस्थानानि च समुद्भूतानि। आचार्यमिश्रवर्योऽपि रसात्मत्वप्रकरण–अलङ्कारात्मत्वप्रकरण–रीतिरात्मत्वप्रकरणमित्यादि–प्रकरणैः प्राक्प्रतिपादितानां काव्यात्मतत्त्वानामुपस्थापनपुरस्सरं ध्वनिमेव काव्यात्मतत्त्वरूपेण प्राक्सरणिमेवाश्रित्य सरल्या सुललितभाषया समुद्घोषयन्ति। उपात्तञ्च –

**तथापि ध्वनिसिद्धान्तः सर्वतत्त्वसमन्वितः।**

**सर्वमान्यः स्थिरश्चेति कृत्वा पश्चात् समीक्ष्यते।**[13]

वैश्वीकरणेऽस्मिन् युगे सञ्चारमाध्यमेन सम्पूर्णमपि विश्वं ग्रामीयति अधुना तथा च ज्ञानविज्ञानस्य प्रसारोऽपि सुकरस्सञ्जातः। अपरस्यां दिशि प्रवर्तमानायाः गवेषणायाः लाभेन समग्रमपि विश्वं विप्रकाशते। प्राचीनां राजपद्धतिं विहाय सर्वत्राप्यवलोक्यते जनतन्त्रस्य प्रभावः। भाषान्तरप्रभावेण सूक्ष्मेक्षणक्षमाः कवयोऽपि विभिन्नान् प्रतिपाद्यानवलम्ब्य रचनास्सम्पादयन्ति। अभिनवैः प्रतिपाद्यैः काव्यविधानां वैविध्यमप्यनुभूयते। एतादृशाः काव्यप्रबन्धाः प्राचीनकाव्यशास्त्रीयमानदण्डैः समीक्षितुमशक्याः समीक्षणाय च काव्यशास्त्रे समुचितो परिष्कारः करणीय इति धिया मिश्रमहोदयः दृश्यश्रव्योभयविधकाव्यविधाया लक्षणेषु अपेक्षितो युगानुकूलश्च परिष्कारस्समकरोत्। स्वातन्त्र्यवीराणां वीराङ्गनानाञ्च चरिताराधनपराणि नैकेष्वङ्गीरसेषु समुपलब्धानि प्रतिपाद्यवैभिन्यपराणि च नाटकान्यवेक्ष्य वस्तुनेतारससम्बन्धिनो परिष्कारः **नाटकलक्षणे** कृतः आचार्येण। तद्यथा–

**धीरोदात्तो भवेन्नेता प्रतापैश्वर्यमण्डितः।**
**देवो भूपोऽथवा कश्चिद् गुणवाँल्लोकनायकः।।**
**नायकस्थापने यत्र लिङ्गभेदो न गण्यते।**
**महिलापि ततो नेता स्यादौदात्यमहीयसी।।**
**शृङ्गारः करुणो वीरश्शान्तो वाङ्गी रसो भवेत्।**
**शेषा यान्तु तदङ्गत्वं स्यान्निर्वहणमद्भुतम्।।**[14]

विविधासु भारतीयभाषासु वैपुल्येन रच्यन्ते एकाङ्किनः। ये समसामयिककुरीतिभिरुद्बोधयन्ति जनान्। सद्यः रसानन्दं प्रददन् समाजं सन्मार्गाय प्रेरयन्ति, लघुकलेवरस्वरूपा एते क्षिप्रमेव लौकिकजनानप्याकर्षयन्ति च। रूपकोपरूपकाभ्यां भिन्ना एव दृश्यते एतस्य प्रवृत्तिरतो तयोर्लक्षणेष्वन्तर्भवितुन्नार्हति। स्वरूपञ्च तस्य स्वकृतौ समवततार आचार्यः।

**नायकोऽत्र भवेद्भूपः पण्डितः पामरोऽथवा।**
**दिव्योऽदिव्योऽथवाऽन्योऽपि शिक्षको भिक्षुको यतिः।।**
**योऽपि कश्चिद् भवेन्नेता पुरुषो महिलाऽपि वा।**
**यादृशञ्चापि वृत्तं स्यान्नाट्यकृत्प्रतिभाश्रितम्।।**
**एकाहचरितञ्चैव लघुनाट्ये प्रयोजयेत्।**
**संवादबहुला भाषा व्यङ्ग्यगर्भाऽत्र सम्मता।।**
**रसः कोऽपि भवेदङ्गी नाट्यवृत्तानुगुण्यतः।**

---

13. अभिराजयशोभूषणम्/आत्मतत्त्वोन्मेषः/49
14. अभिराजयशोभूषणम्/निर्मितितत्त्वोन्मेषः/31–33

**लक्ष्यमेकं परं तस्य भवेद्रङ्गप्रसादनम्।।**[15]

महाकाव्यलक्षणे लोकवन्द्यजनाश्रयत्व–विश्वबन्धुत्वस्थापनक्षमत्व–विश्वमङ्गलकारकत्वादीनि तत्त्वानि संयोजितव्यानि कथानकचयने। समुपलब्धेषु सौलोचनीयं–सावित्रीचरितं–उर्मिलीयं– झांसीश्वरीचरितम् इत्यादिषु महाकाव्येषु महिलानायकं प्रपश्य नायकचयने लैङ्गिकसद्भावं प्रदर्शितमाचार्यैः। खण्डकाव्यस्य दूतकाव्य–अन्यापदेशंकाव्य–स्तोत्रकाव्य–शतककाव्य–प्रहेलिकाकाव्य–विमानयात्राकाव्यादीनां नामानि स्वरूपञ्च संकीर्त्य अत्यन्तं प्रचलितस्य लहरीकाव्यस्य लक्षणं ब्रवीति। तद्यथा–

**परस्परं समासक्ता लहर्यो जलधौ यथा।**
**भङ्गिव्रजं जनयन्त्यो यान्त्यद्वैतस्वरूपताम्।।**
**भक्तिशृङ्गारसन्दर्भाः काव्येऽन्येऽपि तथा यदा।**
**भिन्नाः सन्तोऽपि पुष्णन्ति मूलभावं पुनः पुनः।।**
**लहरीसन्निभा भाषा विच्छितिं जनयन्ति च।**
**नयनाऽसेचनं भूरि वितन्वन्ति निरन्तरम्।।**
**तदा तल्लहरीकाव्यं कोविदैर्विनिगद्यते।**
**अभिराजमतञ्चैतन्निश्चितं बुधतोषणम्।।**[16]

गद्यकाव्ये कथाऽख्यायिकयोर्लक्षणं विमृश्य सम्प्रतिसंस्कृतकाव्येषु प्रवर्तमानानां कथाभेदानां प्राग्विदिभिर्प्रकल्पितैः परिकथा–सकलकथा–खण्डकथेत्यादिभिस्सह समन्वितिर्यथा स्यात् तदर्थं तासां लक्षणेषुसाम्यवैषम्यविवेचनपुरस्सरं निर्णयमकारि आचार्यः। गद्यकाव्यस्य सम्प्रति प्रथिता विधा वर्तत उपन्यास इति संस्कृतेऽपि शिवराजविजयादारभ्य बहूनामुपन्यासानां प्रणयनमभवत्। उपन्यासलक्षणमभिविन्यस्तम् –

**कथाऽऽख्यायिकयोः कश्चिन्मिश्रभेदोऽपि साम्प्रतम्।**
**उपन्यास इति ख्यातो भाषान्तरप्रतिष्ठितः।।**
**कालखण्डविशेषस्य समग्रं जनजीवनम्।**
**प्रतिबिम्ब इवादर्शे न्यस्यतेऽत्र सविस्तरम्।।**
**क्वचित्सामाजिकी क्रान्तिः सर्वोदयसमर्थिनी।**
**रूढिपाखण्डविध्वंसो नवाचारः क्वचित्पुनः।।**
**महाकाव्यवदेवायमुपन्यासोऽपि वस्तुतः।**[17]

फलतः स्वकीयस्य युगानुसारिचिन्तनं ग्रथितं निर्मितितत्त्वे। येन संस्कृतकाव्यशास्त्रस्य सर्जनशीलतायाः प्रकाशनं नितान्तमभिनवमवलोक्यते।

अभिनवत्वपक्षधरैः आचार्यमिश्रमहोदयैः विभिन्नेषु प्रदेशेषु गीयमानानां लोकगीतानां लक्षणानि काव्यशास्त्रे प्रोद्भावितानि, यतो हि स्वतन्त्रताप्राप्त्यनन्तरं संस्कृतभाषाश्रीः लोके निरन्तरं वर्द्धमाना दरीदृश्यते कारणञ्चास्याः लोकगीतानां गलज्जलिकानां छन्दोमुक्तकाव्यानाञ्च सर्जना। गीतात्मकरचनया संस्कृते विकटाक्षरबन्धस्य स्थाने सरससुमधुरपदबन्धानां प्रतिष्ठा सञ्जाता। छन्दोमुक्तकाव्यमाध्यमेन छन्दोविचितिं प्रत्युदासीनानां कवीनामभिव्यक्तया

15. अभिराजयशोभूषणम्/निर्मितितत्त्वोन्मेष/42–45
16. तत्रैव/91–94
17. तत्रैव/105–108

विपुलसाहित्यं प्रसर्जते। एतेषां लोकगीतानां काव्यशास्त्रीया मान्यता प्रतिष्ठा च आवश्यकीति विचिन्त्य सर्वासां विधानां लक्षणोदाहरणानि निबद्धानि ग्रन्थेऽस्मिन्।

प्रकीर्णतत्त्वोन्मेषस्य गीतप्रकरणे गीतस्वरूपं परिभाषयत् महाकविकालिदासस्य भणितिं प्रस्तौति–

**गीतिर्भवति रागस्य सन्ततं परिवाहिणी।**

**रागहारि च गीतं स्यात्कालिदासमतेन वै।।**[18]

महाकविकालिदासस्याभिज्ञानशाकुन्तले हंसपदिकायाः गीतमाकर्ण्य दुष्यन्तः कथयति–' **अहो रागपरिवाहिणी गीतिरिति'** [19] । अत एव गीतिषु निरन्तरं रागाणां लयानाञ्च प्रवाहः भवत्येव। गीतगीतिगेयगानादीनामेकरूपत्वमपि ग्रन्थकारैर्निगदितम् –

**गीतिगीतञ्च गेयञ्च गानमेतन्मिथस्समम्।**

**प्रत्ययाच्छब्दवैभिन्न्यं न पुनर्धातुयोगतः।।**[20]

ललितललितं सुमधुरञ्च गीतं द्विधा विभक्तं शास्त्रीयगीतं लोकगीतञ्च। एषु शास्त्रसम्मतैः रागैर्गीयमानं गीतं शास्त्रीयगीतमेव 'रागकाव्य' इति नाम्ना व्यवह्रियते। किन्तु न तादृशी लोकगीतानां प्रवृत्तिः लोकगीतानां गायनं स्वैरकण्ठेन जनपदग्रामकुलजातीनां परम्परानुसारेण क्रियते। विभिन्नेषु स्थानेषु प्रदेशेषु च गीयमानां लोकगीतानां प्रकृतिर्भिन्ना एव भवति। उट्टङ्कितञ्च –

**यत्पुनर्गीयते स्वैरं यथाकण्ठं यथासुखम्।**

**यथाजनपदग्रामकुलजातिपरम्परम्।।**

**तच्च सद्योरसानन्ददायकं गतबन्धनम्।**

**शास्त्रनियमनिर्मुक्तं लोकगीतं समुच्यते।।**[21]

तत्तज्जनपदेषु स्थानेषु च भिन्नानि लोकगीतानि भवन्ति। यथा–व्रजस्य रसिकगीतं, बङ्गप्रदेशस्य बाउलगीतं, महाकोसलस्य पण्डवानीगीतं, हरियाणाक्षेत्रस्य रागिणीगीतं, गुर्जरप्रदेशस्य दण्डरासकं (डांडिया इति लोकभाषायां) महाराष्ट्रस्याभङ्गगीतम् एवञ्च कजरी–नक्तक–सूतगृह–प्रचरण–वटुक–स्कन्धहारीय–चैत्रक–फाल्गुनिकादीनि लोकगीतानि उत्तरप्रदेशे बिहारप्रदेशे च गीयन्ते तत्तदुत्सवेषु ऋतुषु पर्वेषु च। आचार्यमिश्रमहोदयैः उत्तरप्रदेशस्य बिहारप्रदेशस्य च केषाञ्चन लोकगीतानां प्रतिष्ठा काव्यशास्त्रे कृता। यथा कजरी नामकं लोकगीतं कोसलप्रदेशे काश्याञ्च वर्षाकाले गायन्ति। कजरीतिपदस्याभिनवव्युत्पत्तिरपि प्रदर्शिता आचार्यैः **'कं पतिसाहचर्यजन्यं सुखं जरयतीति भावबोधिनी गीतिः'** कजरी इति।[22] कजरीगीतमाध्यमेन प्रोषितभर्तृकाभिः नायिकाभिः स्वकीयं नायकं प्रति स्वीया विरहव्यथा प्रदर्श्यते। तल्लक्षणं व्याचख्युराचार्यः –

**कोसलेषु च काशीषु गीयते हि घनागमे।**

**गीतिका कजरीनाम्नी नैकरागसमाश्रिता।।**

---

18. अभिराजयशोभूषणम् / प्रकीर्णतत्त्वोन्मेषः / 10
19. अभिज्ञानशाकुन्तलम् / 5 / पृ. 322
20. अभिराजयशोभूषणम् / प्रकीर्णतत्त्वोन्मेषः / 9
21. तत्रैवः / 13–17
22. तत्रैव / 24 वृत्तौ

**वियोगिन्या हि गीतेऽस्मिन् प्रोषितं नायकं प्रति।**

**उपालम्भाः प्रदीयन्ते विस्मृतिक्षोभकारकाः।।**[23]

कजरीगीतस्य स्वोपज्ञमुदाहरणन्निबध्नाति। तद्यथा–

**रौति कोकिला मदालसा रसालतरौ**

**गोपिता तमालतरौ रे**

**क्वचित्पल्लवे निलीय, मञ्जरी रसं निपीय**

**स्तौति सम्मुखं वसन्तकं रसालतरौ**

**गोपिता तमालतरौ रे!!**

कजरीगीतस्य भिन्न–भिन्नरागाश्रितानि नैकान्युदाहरणान्युपन्यस्तानि। अथ च व्रजक्षेत्रे नन्दनन्दनस्य भगवतः कृष्णस्य रासलीलामुपलक्ष्य शरदृतौ रसिकाख्यानि गीतानि गीयन्ते व्रजवासिभिः। यथा रसिकगीतस्य (रसिया इति लोकभाषायाः) लक्षणमुपात्तम्–

**रासोत्सवं समालक्ष्य मुकुन्दराधिकाश्रितम्।**

**रसिकं गीयते प्रीत्या व्रजेषु शरदागमे।।**[24]

हरिदत्तशर्म्मविरचितङ्गीतमस्योदाहरणम्। तद्धि–

**श्रृणु रे मातः! श्रावणमासोऽप्यायातः**

**नाद्य प्रेयानायातः स्फुरति गगनतले दामिनी!!**

**दृश्यन्ते परितोऽम्भः श्यामा मेघाडम्बरमालाः**

**अविरलवर्षणगहनगर्जनैः कम्पन्ते नवबालाः**

**धनतमसाछन्ने गगने, चलिते सुखशीतलपवने**

**भवति कामेहा मे स्वामिनी!!**

इतोऽपि नक्तक–सूतगृह–प्रचरण–वटुक–स्कन्धहारीय–चैत्रक–फाल्गुनिकादीनि लोकगीतप्रकाराणि अवोचन्।

अनेकतायां विलसत्येकताऽस्मदीये भारतवर्षे । अत एव हि विभिन्नानां धर्मजातिसम्प्रदायानां देशान्तरसंस्कृतीनां भाषान्तरसाहित्यानाञ्च समत्वमप्येकत्र दरीदृश्यते। तेन कवितल्लजाः भाषान्तरकाव्यविधाः आश्रित्य स्वकीयाभिर्भणितिभीरसध्वनिविहारवतां सह्रदयानाञ्चेतश्चमत्कुर्वन्ति। फलतः देववाणीकवीश्वराणामद्वितीयेन कल्पनावैशिष्ट्येन तान्का–हाईकू–सॉनेट–गजलप्रभृतिदेशान्तरकाव्यविधाः उपसर्ज्य सर्वेप्युपकृताः वयम्। आसु पारसीकसाहित्यस्य गजलगीतिरिति मौगलशासनावधौ भारतीयासु भाषास्वभिनवकलेवरेण प्रतिष्ठिता। देववाणौ तावत् प्राथम्येन भट्टमथुरानाथशास्त्रिमहोदयेन गजलगीतानि विरचितानि । तत आरभ्य अद्यावधि संस्कृतगजलसर्जना साहित्यैश्वर्यं विवर्धयति। आचार्यमिश्रमहोदयः पारसीकीं छन्दोविचितिं सांविधानकञ्चाधृत्य गजलगीतीनां स्वरूपं सुस्पष्टीकरोति। नूतनाभिधानपुरस्सरं तस्या व्युत्पत्तिञ्चाभिधत्ते –

**तत एव मया गीतिराख्यातेयं गलज्जला।**

**गलन्नेत्रजलत्वाद्वा सा गलज्जलिका पुनः।।**[25]

23. तत्रैव / 23–24

24. तत्रैव / 24

गलन्नेत्रजलत्वाद्वा यया सा गलज्जला गलज्जलिकेति वा । गलज्जलिकायाः पारसीकछन्दोविचितावद्वितीयो बन्धविस्तरः दृष्टिपथमुपयाति, सो हि **'बहर'** इति नाम्नाऽभिज्ञायते। संस्कृतछन्दसि यथा बन्धविस्तारे गणानां क्रमः तथैव बहरेऽपि। पारसीके साहित्ये बहरभेदानाश्रित्य **'मुतकारबे मुसम्मन सालिम'** तथा च **'बहरे कामिल मुसम्मन'** इत्युभौ पर्यायौ जगदुः। अस्यां मफऊल–फऊलून–फाइलुनसंज्ञकानां गणानां व्यवस्थाऽपि समवलोक्यते। गजलस्य त्रयाणाम्भागानां **मतला–शेर–मकता**ऽख्यानां परिभाषयनुक्तमाचार्यैः–

**गजलारम्भि यद्वाक्यं मूलभावप्रकाशकम्।**

**तदेव फारसीवाचि मतलेति समुच्यते।।**[26]

अत्रोच्यते गजलस्य पस्पशा याऽदौ निबध्यते सा मतलेति नाम्नाऽभिधीयते; तस्या एव परिष्कृतमभिधानं आरम्भिकाख्यं विनिश्चितं ग्रन्थे। आरम्भिकाया उदाहरण आचार्यबच्चुलालावस्थिनां गजलगीतिः प्रस्तौति –

**पिकाः कूजन्ति माकन्देषु कूजेयुः किमायातम्?**

**समीरा दाक्षिणात्या मन्दमञ्चेयुः किमायातम्?**

अन्तिमे बन्धे यस्मिन् कविः स्वाभिधानमुपनाम वा विनिवेशयति सो मकतेति संज्ञया विभूष्यते। तस्या एवान्तियकेत्यभिराजस्याभिधानम्। प्रस्तुतञ्चात्र–

**अन्तिमश्चापि यो बन्धः कविनामाङ्कितः खलु।**

**सोऽपि गजलतत्त्वज्ञैः मकतेति निगद्यते।।**[27]

यथोपरि निर्दिष्टस्य गजलस्यान्तिमो बन्धः –

**नहि ज्ञानेन सिध्यत्यर्थ इत्याश्रित्य विज्ञानम्**

**कदर्या आर्यमर्यादां विलुम्पेयुः किमायातम?**

अत्र ज्ञान इति कविवरबच्चुलालावस्थिनामुपनाम। आरम्भिकाऽन्त्यिकामतिरिच्य (मतलामकतेति) बहरे संस्थापिताः शेषाः बन्धाः शेरसंज्ञकाः भवन्ति ; यैः मतलायां समागतानां मूलभावानां परिपोषणं भावान्तरैः रसान्तरैश्च कविभिः क्रियन्ते। आचार्यदृशा शेर इत्याख्यः बन्धविशेषः मध्यिका इति नामान्तरेण ज्ञायते। मतलाया अन्तिमो शब्दः जेगीयन्ते कवयः प्रतिबन्धे। आवर्तिष्यमाणः स शब्दः 'काफिया' इति। यथा–

**यथाशक्ति पानीयवर्षाभिरुर्वीम्**

**समुद्य प्रणश्यामि<u>धाराधरोऽहम्</u>।।**

अत्र धाराधरोऽहमिति शब्दस्य काफियेत्यभिधानम्। वस्तुतस्तु पारसीकभाषायां विभिन्नैः प्रतिपाद्यैः मदिरालयादिभिराधृत्य गजलगीतानि सर्ज्यन्ते। परं देववाणीकवीश्वराः संविधानकं परिगृह्य देशकालपरिस्थित्यनुसारेण संस्कृतिगौरवेण च प्रतिपाद्यानि चिनेयुः। चतुर्दशमात्रादारभ्य द्वात्रिंशमात्रां यावत् विभिन्नानां समकालीनकवीनामुदाहरणानि प्रस्तुतानि गजलगीतानाम्।

सम्प्रति अर्वाचीनैर्कविभिर्बहुशः प्रणीयन्ते छन्दोमुक्तकाव्यग्रन्थाः ये पद्यगतनियामकतत्त्वेभ्यः विरहिताः वर्णमात्रागणक्रमरहिताः सन्तः लयत्वमुत्पादयन्ति। वस्तुतः कश्चिदपि शब्दः छन्दरहितो न लभ्यते। न च छन्दः शब्दवर्जितः। अतो अनयोर्मध्ये कश्चन विशिष्टः सम्बन्ध इति नाट्यशास्त्रकारेणोपादीयते तथापि काश्चन एतादृशाः रचनाः

25. अभिराजयशोभूषणम्/प्रकीर्णतत्त्वोन्मेषः/67
26. तत्रैव/75
27. तत्रैव/76

समुपलभन्ते तासां विषये आचार्यमिश्रमहोदयः अर्वाचीनकाव्यविधामिमां आंग्लभाषायाः लयवाहीदं गद्यमिति (Rhythemic Prose) संज्ञयाऽभिधीयते। तदित्थं स्पष्टीक्रियते –

**गद्यपद्योभयात्मेदं छन्दोमुक्तं हि वाङ्मयम्।**
**पद्यात्मकलयेनैव यद्धि गद्येन लिख्यते।।**
**वस्तुतो लयवाहीदं गद्यमेव न चापरम्।**
**प्रसिद्धमाङ्ग्लभाषायां रिद्मिकप्रोज़संज्ञया।।**
**प्राचीनजावीभाषायामपि गद्यं तदीदृशम्।**
**सुलुकं नाम गेयात्म वायाङ्गेषु महीयते।।**[28]

गेयगद्यं प्राचीनजावीभाषासहित्येस्वपि समुपलभ्यते तत्र सुलुकं नामाभिधमिदं वायाङ्गेषु अर्थात् नाटकेषु प्रयुज्यते।

नैष्कर्ष्येणेदं विभाति यदाचार्य–अभिराजराजेन्द्रमिश्रमहोदयानां क्वचिच्चिरन्तनकालिकानां काव्यशास्त्रीयतत्त्वानां समीक्षणविषयकः नवतमरूपेणोपन्यासः निश्चयेन प्राक्कालिकीं शास्त्रीयपरम्परामधिगन्तुं आधुनिकसन्दर्भाणाञ्च परामर्शयितुं अस्मान् सर्वानप्युपकरोति।

**सन्दर्भग्रन्थसूची–**


1. काव्यालङ्कारकारिका, आचार्यरेवाप्रसादद्विवेदी, कालिदाससंस्थानम् वाराणसी, द्वितीयसंस्करणम् 2012
2. अभिनवकाव्याङ्कारसूत्रम्, राधावल्लभत्रिपाठी, हिन्दीव्याख्याकारः रमाकान्तपाण्डेयः, जगदीशसंस्कृतपुस्तकालयः जयपुरम्, 2009
3. चमत्कारविचारचर्चा, प्रो. रामप्रतापवेदालङ्कारः, विश्वेश्वरानन्दवैदिकशोधसंस्थानम् होशयारपुरम् पंजाब2004
4. बिल्हणविरचितविक्रमाङ्देवचरितम्, श्रीहरगोविन्दशास्त्री, चौखम्बासुरभारतीप्रकाशनम्, 2009
5. अभिज्ञानशाकुन्तलम्, श्रीनवकिशोरकरशास्त्री, चौखम्बा–अमरभारतीप्रकाशनम् 2010
6. अभिराजयशोभूषणम्, प्रो. अभिराजराजेन्द्रमिश्रः, वैजयन्तप्रकाशनम् इलाहाबादः, 2006
7. दूर्वा, वीणापाणिसंस्कृतपीठम् भोपाल, द्वितीयोन्मेषः, अप्रैल–मई–जून 2005
8. काव्यप्रकाशः, आचार्यमम्मटः, सम्पादकः आचार्यरेवाप्रसादद्विवेदी, काशीहिन्दूविश्वविद्यालयः वाराणसी।


28. अभिराजयशोभूषणम् / प्रकीर्णतत्त्वोन्मेषः / 100–102